# ब्रह्म संहिता

ध्यानम्

कृष्णाय वासुदेवाय देवकी नंदनाय च ।
नंदगोप कुमाराय गोविंदाय नमो नमः

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतः क्लेश नाशाय गोविंदाय नमो नमः

नमः पङ्कज नाभाय नमः पङ्कज मालिने ।
नमः पङ्कज नेश्राय नमस्थे पन्कजान्ग्रये

स्तोत्रम्

ईश्वरः परमः कृष्ण सच्चिदानन्द विग्रहः ।
अनादि रादि र्गोविन्द सर्व कारण कारणम् 1

चिन्तामणि प्रकर सद्मसु कल्पवृक्ष
लक्षावृतेषु सुरभी रभि पालयन्तम् ।
लक्ष्मी सहस्र शत सम्भ्रम सेव्यमानं
गोविन्द मादि पुरुषं तमहं भजामि 29

वेणुं क्वणन्त मरविन्द दलायताक्षं
बर्हावतंस मसि ताम्बुद सुन्दराङ्गम् ।
कन्दर्प कोटि कमनीय विशेष शोभं

गोविन्द मादि पुरुषं तमहं भजामि 30

आलोल चन्द्र कलसद्वन माल्यवंशी-
-रत्नाङ्गदं प्रणय केलि कला विलासम् ।
श्यामं त्रिभङ्ग ललितं नियत प्रकाशं
गोविन्द मादि पुरुषं तमहं भजामि 31

अङ्गानि यस्य सकलेन्द्रिय वृत्ति मन्ति
पश्यन्ति पान्ति कलयन्ति चिरं जगन्ति ।
आनन्द चिन्मय सदुज्ज्वल विग्रहस्य
गोविन्द मादि पुरुषं तमहं भजामि 32

अद्वैत मच्युत मनादि मनन्त रूपं
आद्यं पुराण पुरुषं नवयौवनं च ।
वेदेषु दुर्लभ म दुर्लभ मात्मभक्तौ
गोविन्द मादि पुरुषं तमहं भजामि 33

पन्थास्तु कोटि शतवत्सर सम्प्रगम्यो
वायो रथापि मनसो मुनि पुङ्गवानाम् ।
सोऽप्यस्ति यत्प्रपद सीम्न्य विचिन्त्य तत्त्वे
गोविन्द मादि पुरुषं तमहं भजामि 34

एकोऽप्य सौ रचयितुं जगदण्ड कोटिं
यच्छक्तिरस्ति जगदण्ड चयाय दन्तः ।
अण्डान्तरस्थ परमाणुच यान्तरस्थं

गोविन्द मादि पुरुषं तमहं भजामि 35

यद्भाव भावितधियो मनुजा स्तथैव
सम्प्राप्य रूप महिमासन यानभूषाः ।
सूक्तैर्य मेव निगम प्रथितैः स्तुवन्ति
गोविन्द मादि पुरुषं तमहं भजामि 36

आनन्द चिन्मय रस प्रति भाविताभि:
ताभिर्य एव निजरूप तया कलाभिः ।
गोलोक एव निव सत्यखि लात्मभूतो
गोविन्द मादि पुरुषं तमहं भजामि 37

प्रेमाञ्ज नच्छुरित भक्ति विलोचनेन
सन्तः सदैव हृदयेषु विलोकयन्ति ।
यं श्याम सुन्दर मचिन्त्य गुण स्वरूपं
गोविन्द मादि पुरुषं तमहं भजामि 38

रामादि मूर्तिषु कला नियमेन तिष्ठन्
नानावतार मकरोद्भुवनेषु किन्तु ।
कृष्णः स्वयं समभवत्परमः पुमान् यो
गोविन्द मादि पुरुषं तमहं भजामि 39

यस्य प्रभा प्रभवतो जगदण्ड कोटि-
-कोटिष्वशेष वसुधादि विभूति भिन्नम् ।
तद्ब्रह्म निष्कल मनन्त मशेष भूतं

गोविन्द मादि पुरुषं तमहं भजामि 40

माया हि यस्य जगदण्ड शतानि सूते
त्रैगुण्य तद्विषय वेदवि तायमाना ।
सत्त्वा वलम्बि परसत्त्वं विशुद्ध सत्त्वं
गोविन्द मादि पुरुषं तमहं भजामि 41

आनन्द चिन्मय रसात्मतया मनःसु
यः प्राणिनां प्रतिफलन् स्मरता मुपेत्य ।
लीलायितेन भुवनानि जयत्यजस्रं
गोविन्द मादि पुरुषं तमहं भजामि 42

गोलोक नाम्नि निजधाम्नि तले च तस्य
देवि महेश हरि धामसु तेषु तेषु ।
ते ते प्रभाव निचया विहिताश्च येन
गोविन्द मादि पुरुषं तमहं भजामि 43

सृष्टि स्थिति प्रलय साधन शक्तिरेका
छायेव यस्य भुवनानि बिभर्ति दुर्गा ।
इच्छानु रूप मपि यस्य च चेष्टते सा
गोविन्द मादि पुरुषं तमहं भजामि 44

क्षीरं यथा दधिविकार विशेष योगात्
सञ्जायते न हि ततः पृथगस्ति हेतोः ।
यः शम्भुता मपि तथा समुपैति कार्यात्

गोविन्द मादि पुरुषं तमहं भजामि 45

दीपार्चि रेव हि दशान्तर मभ्युपेत्य
दीपायते विवृत हेतु समान धर्मा ।
यस्ताद्दगेव हि च विष्णु तया विभाति
गोविन्द मादि पुरुषं तमहं भजामि 46

यः कारणार्णव जले भजति स्म योग-
-निद्रा मनन्त जगदण्ड सरोमकूपः ।
आधार शक्ति मवलम्ब्य परां स्वमूर्तिं
गोविन्द मादि पुरुषं तमहं भजामि 47

यस्यैक निश्वसित काल मथावलम्ब्य
जीवन्ति लोमबिलजा जगदण्ड नाथाः ।
विष्णु र्महान् स इह यस्य कला विशेषो
गोविन्द मादि पुरुषं तमहं भजामि 48

भास्वान् यथाश्म शकलेषु निजेषु तेजः
स्वीयं कियत्प्रकट यत्यपि तद्वदत्र ।
ब्रह्मा य एष जगदण्ड विधान कर्ता
गोविन्द मादि पुरुषं तमहं भजामि 49

यत्पाद पल्लव युगं विनिधाय कुम्भ-
-द्वन्द्वे प्रणाम समये स गणाधिराजः ।
विघ्नान् विहन्तु मलमस्य जगत्त्रयस्य

गोविन्द मादि पुरुषं तमहं भजामि 50

अग्निर्मही गगन मम्बु मरुद्दिशश्च
कालस्तथात्म मनसीति जगत्त्रयाणि ।
यस्माद् भवन्ति विभवन्ति विशन्ति यं च
गोविन्द मादि पुरुषं तमहं भजामि 51

यच्चक्षुरेष सविता सकल ग्रहाणां
राजा समस्त सुरमूर्ति रशेष तेजाः ।
यस्याज्ञया भ्रमति सम्भृत कालचक्रो
गोविन्द मादि पुरुषं तमहं भजामि 52

धर्मोऽथ पाप निचयः श्रुतय स्तपांसि
ब्रह्मादि कीट पत गावधयश्च जीवाः ।
यद्दत्त मात्र विभव प्रकट प्रभावा
गोविन्द मादि पुरुषं तमहं भजामि 53

यस्त्विन्द्र गोप मथवेन्द्र महो स्वकर्म-
-बन्धानु रूप फल भाजन मातनोति ।
कर्माणि निर्दहति किन्तु च भक्ति भाजां
गोविन्द मादि पुरुषं तमहं भजामि 54

यं क्रोध काम सहज प्रणयादि भीति-
-वात्सल्य मोह गुरु गौरव सेव्यभावैः ।
सञ्चिन्त्य तस्य सदृशीं तनुमापुरेते

गोविन्द मादि पुरुषं तमहं भजामि 55

श्रियः कान्ताः कान्तः परम पुरुषः कल्प तरवो
द्रुमा भूमि श्चिन्तामणि गणमयि तोय ममृतम् ।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखि
चिदानन्दं ज्योतिः परमपि तदास्वाद्य मपि च ।
स यत्र क्षीराब्धिः स्रवति सुरभीभ्यश्च सुमहान्
निमेषार्धाख्यो वा व्रजति न हि यत्रापि समयः ।
भजे श्वेतद्वीपं तमह मिह गोलोक मिति यं
विदन्तस्ते सन्तः क्षिति विरल चाराः कतिपये 56

इति श्री ब्रह्म संहिता सम्पूर्णम् ।